कात्यायनसूत्रपद्धतिः

४५४८

नं. ४५४८

श्री गणेशाय

नी

धा ने

श्री

श्री श्री

वेद्यतोवट ... न्मभवका·
परिपाक प्रेशतयः।।
वेटश्रो घात

श्रीगणेशायनमः॥ ॥अथनिरूढपशुबंधस्यपद्धतिर्लिख्यते॥ ॥सचऐंद्राग्नीदेवतोवासूर्य
देवतोवाप्रजापतिदेवतोवाप्रतिवर्षंवर्षाप्रवृत्तौश्रावणादिचतुर्णांपर्वणांमध्येअन्यतरस्मिन्भ
वति।अथवादक्षिणायनदिनेउत्तरायणदिने।अस्मिन्पक्षेएकस्मिन्वर्षेपशुद्वयंभवति।तत्र
प्रथमप्रयोगेमातृपूजापूर्वकमाभ्युदयिकंकृत्वा।अन्वारंभणीयावापशोःसान्नाय्यविकारत्वा
दनुदितेप्रारंभः॥तत्रपूर्वंऋत्विग्वरणं॥पशुदक्षिणेनवाधेनुदक्षिणेनवावरदक्षिणेनवा।गो
त्रशर्मन्।ऐंद्राग्नेननिरूढपशुनासौर्येणवाप्राजापत्येनेष्टिवा।दक्षिणादेवताविकल्पाः।पक्षत्र
याणांप्रयोगेविकल्पः।ब्रह्माहोताध्वर्युःमैत्रावरुणःप्रतिप्रस्थाताआग्नीध्रश्चएतेषांषण्णांऋत्वि
जांक्रमेणवरणं।ततस्तान्यथासंभवमर्चयेत्।ततोध्वर्युःपंचभूसंस्कारपूर्वकमाहवनीयद ॥१॥
क्षिणाग्न्योरुद्धरणंकरोति।तत्रनिरूढपश्वर्थंगार्हपत्यादितिप्रयोगः।अग्न्यन्वाधानेचतुरा
सने॥ब्रह्मवरणं।ऐंद्राग्नेननिरूढपशुनावापस्यामहेतत्रभूयतदिति।व्रतग्रहणं।ततोयूप

कृत्यर्थमाज्यसंस्कारः। निरुप्याज्यं गार्हपत्येऽधिश्रयति। स्रुवं दर्भैः स्रुवस्य संमार्गः। ततो जुह्वाः सं
मार्गः। उद्वासनं। सायं प्रातर्दर्भाभ्यामाज्यस्योत्पवनं। आज्यस्यावेक्षणं। जुह्वां चतुर्गृहीतं गृही
त्वा समिधमादायाहवनीयं प्रतिगत्वा समीप उपविश्याहवनीयं परिस्तीर्यछाय प्रागग्रामुद
गग्रां वा समिधमाधायोपविश्योरु विष्णविति जुहोति। इदं विष्णवे। अथवा स्रुवेणैव जुहोति
न स्रुचा। तस्मिन्पक्षे स्रुवस्यैव संमार्गः। तत आज्यशेषं स्थालीस्थमादाय स्रुक्स्रुवं चादाय तत
स्तत्रधारेण सहितो यूपं प्रति गच्छति। ब्रह्मयजमानौ दक्षिणत उपविशतः। ब्रह्मणस्तूष्णीमास
नसंस्कारः। तत्र यूपस्य लक्षणमुच्यते। पालाशं बकुलपर्णयुक्तं। अष्टाश्रं ऊर्द्ध्वसकलशाखं
मध्येऽग्रे च वक्रं। अव्रणं। एकजं। एवंविधस्य यूपस्य पलाशात्पश्चात्प्राङ्मुख उपविश्य यूप
मन्त्रिमस्य जपति। अत्यन्यानगानिति। अथवा पश्चात्प्राङ्मुखस्तिष्ठन्यूपमभिमंत्रयते। अ
त्यन्यानित्येव मंत्रेण। ततो यूपच्छेदप्रदेशे साज्येन स्रुवेणोपस्पृशति। विष्णवे त्वेति। छे

दनप्रदेशं सर्वतोकयतीत्यर्थः। ततओषधइतितृणात रुणमंतर्द्धायस्व विधितइतिपरस्तुनाप्रह
रति। स्रुवेणांकितप्रदेशे। प्रथमशकलमादायसुगुप्तस्थापयति। अग्रेस्तूपावटमध्येप्रक्षेपार्थं
तथाविधंस्तूपस्यछेदनंकर्तव्यंयथावशिष्टः स्थाणुरनसोगच्छतोक्षनस्पृशाति। ततस्छिन्न
यायंस्तूपंहस्तेनप्रेरयित्वाप्राच्यामुदीच्यांवापातयेत्। नदक्षिणस्यांदिशि। ततोद्यांमालेखीरि
तिमंत्रेणापतंतंस्तूपमध्वर्यूरक्षिमंत्रयते। ततस्तस्मीपर्णशाखादिपातनेनस्तूपशोधनं। ततःस्था
2 णुपरिस्तीर्यजुह्वांसकृद्गृहीतमाज्यंगृहीत्वा। अतस्त्वमितिस्थाणौजुहोति। इदंवनस्पतये।
तत्राज्यंस्रुवेचस्तूपाहृत्यर्थंसंस्कृतमेव। आज्यंनपुनःसंस्करणीयं। स्तूपाहुत्यांस्रुवेणहोम
पक्षेजुह्वाऽन्नसंसर्गः कर्तव्यः। ततोमूलाद्यग्रंचतुररत्निप्रमाणंत्र्यरत्निप्रमाणंपंचारत्नि
प्रमाणंवामित्वावशिष्टमग्रंछिंद्यात्। ततःपुनश्छेदनंनकार्यं। ततोस्तूपंमूलेपंचमांशंत्यक्त्वा ॥२॥\
तक्षास्तूपंतक्षणेनाष्टकोणंकरोति ततोवशिष्टतोस्तूपाग्राच्चापालंप्रथुमात्रमष्टकोणंम

मसंगृहीतंऊर्ध्वंस्वांतंकृत्वास्रुपस्याग्रेतथाप्रमुंचति। यथाचफलादूर्ध्वं घंगुलंत्र्यंगुलं
वास्रुपस्याग्रंपरिशिष्यते। ततोस्रुपस्यमूलात्प्रादेशमात्रः स्वड्गाकारः स्वरुकार्यः। एत
दष्टाश्रीकरणादिसर्वंतक्षणाकर्त्तव्यं। ततः पश्चादागत्यपुनराज्यंसंस्कृतंपंचगृहीतंगृ
हीत्वापरिस्तीर्यसमिधमधापश्चाहवनीयेघोष्यष्टमितिमंत्रंमनसोच्चार्यजुहोति। इदंवा
वस्पतये॥ प्रथमाकंडिका॥ १॥ ततोब्रह्मयजमानौउत्तरवेदेर्दक्षिणतोबहिर्वेदिंउपविशतः॥
ततोयजमानवाचंयच्छेतिप्रेषः। ततः प्रणपस्यपश्चादुत्तरतोवाषण्णांपात्राणामासादनं।
अग्निहोत्रहवणीस्फ्यः। पवित्रछेदनानि पवित्रे। अंतर्द्धानतृणंद्वात्रिंशदंगुलीशम्यावा
रणीच। ततोवाग्यतः पवित्रेछित्वाप्रोक्षणीः संस्कृत्यवज्रांतर्द्धानतृणशम्यानांप्रोक्षणं
करोति। ततोगार्हपत्यस्याग्रेप्रोक्षणीनांनिधानंततः स्फ्यादानादि। चतुररत्निः पश्चा
त्तिर्यक्। षडरत्निर्मध्येप्राची। त्र्यरत्निः पुरस्तात्तिर्यक्। तेषांत्रयाणामध्वरांगः। ततो ॥३॥

वेदिं दक्षिणत उत्तरतः श्च मध्यसंगृहीतां कृत्वा अग्निमन्त्रितां सो कुर्यात् । अत्र वेदिसाधनोपा
पन्नतश्लोकः । नवारत्निमितारज्जुर्द्विक्षिता षट् स्वतः परं ॥ अर्द्धं द्वौ त्रिषु पाशाः स्यात्पशुवेदेः
प्रसाधने ॥ प्रकारांरं चीहस्तत्नौ लक्षणं कुर्याद्दर्द्धे त्रयतथा ॥ अर्द्धारत्नौ ततः सार्द्धवेदिः सापशु
कीमता ॥ अत्र संगृह साधनानि दर्शपूर्णमासवेदिवत् ॥ एवं वेदिं मित्वा वेदिपरिसमूहनं ॥
उत्करकरणं । सतृणवज्नादानादि सतृणपुरीषस्योत्करे प्रक्षेपांते पूर्ववपरिग्रहे ॥ वेद्यास्त्रिरु
ल्लेखने ॥ हरणप्रैषः । हरणं । संमर्शनं । संमर्शनानंतरमद्धर्युः । शम्यास्फ्यं चादाय उत्करस्य
3 पुरस्तादे तस्याग्रे गमनागमनाय संचरं मार्गं परित्यज्य वेद्यातचात्वालं निमीते । तत्र पूर्वपश्चा
दुदगग्रां शम्यां निधाय स्फ्येनातलिखति तत्स्नायनीति स्फ्येनोतलिखति ॥ ततो दक्षिणतो
वेसांगलग्नां प्राचीं शम्यां निधाय स्फ्येनोतर्से स्वांकरोति । अवतान्मानाथितादिति ॥ ते
तउत्तरतः । प्रागग्रां प्राचीं शम्यां निधाय स्फ्येनोतसैं स्वांकरोति । अवतान्मानाव्यथिता ॥२॥

दितिमंत्रेण । पंचशम्याप्रमाणं चतुष्कोणं चात्वालं परिलिख्य यजमानेत्वा रक्षे विदे दमिरि

ति चात्वाले स्फ्येन प्रहरति । प्रहरणानंतरमेव विसर्गः । ततः प्रहारेण खातं पुरीषं हस्तेन स्फ्ये

न चाग्ने अंगिर इति वेदेः पूर्वार्द्धे प्रेति हृत्य पूर्वार्द्धे निखातशंकुसंनिधाने वेदिमध्ये तत्पुरीषं यो अस्या

मिति मिमंत्रेण निवपति । आग्नीत पुरीषं उत्करवद् न्निन्यस्येति । एवमेव प्रहरणान्निन्यासांतं वा

रद्वयं कर्तव्यं । पुरीषनिवापे मंत्रे विशेषः । यो द्वितीयस्यामिति द्वितीयपुरीषनिवापे । यस्तृ

तीयस्यामिति तृतीयपुरीषनिवापे । ततः स्फ्येनाभ्यावाचात्वालं इत्यादेशोत्तरवेदिं निःपति पर्याप्तं

पुरीषमनु त्वेति हृत्वा तेन पुरीषेणोत्तरवेदिं निःपादयति । सि८ ह्यसीति मंत्रेण कल्पस्येत्यंते

नद्वात्रिं८शदंतशंम्याप्रमाणं चतुरस्रं ॥ पूर्वार्द्धशंकोः पश्चात्पदमात्रं अधिकं वा परित्यिप्यत

तः प्रत्यगुपदेशात् पदमात्रे ऽप सिवाद्वात्रिंशदंगुलामुत्तरवेदिं चतुःस्रंक्तिं कुर्यात् । इति

कठसूत्रेदर्शनात् ॥ अपरेण यूपावटं संचरमवशिष्योत्तरवेदिं निवपेद् द्वित्वापसंवतं

उत्तरवेदिमध्येनाभिंप्रादेशमात्रीं चतुरस्त्रां करोति। ततः सिं८ह्यसीति शुंधस्वेत्यतेनोत्तरवेदिं स
ङ्गिप्रोक्षति॥ ततः सीं८ह्यसीति शुंधस्वेत्यंत्रेनोत्तरवेदिरुपरि सिकताः प्रकिरति॥ ततः उंदंबरशा
खाभिः प्लक्षशाखाभिर्वा उत्तरवेदिं छादयति॥ दर्भैरछादयंतिवानवस्त्रैः ततोष्टाविंशतिकाष्ठस्य
ध्मस्य त्रिवृन्नबद्धस्याहवनीये धिश्रयणं पयमनीनांचोपकल्पनं। अनंतरं कर्परे सिकतावामृत्ति
कावाउपयमन्य इत्युच्यंते॥ ताश्च प्रदीप्तस्येध्मयोर्द्धमुद्यम्य तस्याधस्तात् कर्परादिस्थापयंते ता
पनिरावाणार्थं॥ आज्यसंस्कारः। जुह्वां पंच गृहीतग्रहणं देवदारुपरिधीनामुपकल्पनं। ततः
5 पंचगृहीतमाज्यमुद्यम्य कृत्वा त्रेस्थिता सो किंकीः प्रोक्षणीश्चोद्यम्य प्रदीप्तमिध्मं चोद्यम्यो
पयमनीभिः कर्परस्थाभिरधस्ताधारयित्वाध्वर्युरग्नये प्रक्रियमाणायानुब्रूहीति वदति॥ त
त एकस्फ्यया न्दिहीति प्रतिप्रस्थातारं प्रेष्यति। होत्राप्रवेद देत्से प्रस्थाप्य वित्रिरुकायां ॥वेद्यांधृ॥
सर्वांअग्निमुत्तरवेदिं प्रतिहरंति। वेदेरुत्तरमार्गेणाकर्ठस्तत्रात्॥ ततः प्रतिप्रस्थाताह

वनीयादास्त्ववेदिष्येस्फ्येनलेखांकरोतिउत्तरवेदिंयावत्॥दक्षिणाश्रोणियावद्वा।ततोध्वर्यु
रग्निमन्यस्मैप्रदायप्रोक्षणीरादायोत्तरवेदेर्दक्षिणतोवेदिमध्येउदङ्मुखस्तिष्ठत्प्रतिदिशं
उत्तरवेदिंप्रोक्षति॥हस्तेनैवलौकिकंप्रोक्षणीभिः इंद्रघोषइतिपुरस्तात्प्रचेतापितृश्चात्
मनोजवास्त्वाइतिदक्षिणतः विश्वकर्मात्वेत्युत्तरतः।इदमहमिति।एवंविधेनमंत्रेणप्रोक्षणी
शेषंनिनयति।अमुमित्तस्यस्थानेशत्रोर्द्वितीयांतनामग्रहणं।अत्रिचारयस्त्वेवोदकस्पर्शोन
नान्यत्र।ततउत्तरतउपविश्यनाभ्याःश्रोण्यंसेषुपंचगृहीतंजुहोत्यध्वर्युः॥हिरण्यंयत्रके
चनस्थितंपश्यन्नाभिःपरिस्तीर्यसिंहीयसिस्वाहेत्यादिभिः॥पंचभिर्मंत्रैःप्रतिमंत्रंतक्रमः।
पूर्वेदक्षिणेसेसिंहीयसितिस्वाहेतिइदं सिंहीयो॥सिंहीयस्यादित्यवनिःस्वाहेतिउत्त
रश्रोण्यां।इदं सिंहीयेआदित्यवंत्यै।सिंहीयसिब्रह्मवनिःक्षत्रवनिःस्वाहेतिदक्षिण
श्रोण्यां सिंहीयेब्रह्मवन्यैक्षत्रवन्यै।सिंहीयसिसुप्रजावनीरायस्पोषवनिरिति॥उत्तरे

सेऽग्नुहोति। सि० स्वेसुप्रजाऽवन्यैरायस्पोषवनन्यै। ततोमध्येऽग्नुहोति। सि० ह्यस्पावहादेवा
न्यजमानायेति। इदंसि० स्वे। ततोऽग्नेतेऽस्वेतिहोमार्थनीचीलतोस्त्रा चमस्त्रुचौकरोति। ततो
देवदारुवृक्षोच्छेः प्रादेशमात्रैः त्रिभिः परिधिभिः नाग्निपरिदधाति। ध्रुवोसिपृथिवीमिति
मध्यमेपश्चादुदगग्रं। ध्रुवक्षिदसीतिदक्षिणंप्रागग्रं। अच्युतक्षिदसीतिउत्तरंप्रागग्रं। ततो
ग्नेः पुरीषसीतीनाम्नोमुपरिगुत्सुगुत्सुरोहितजंपुष्पंमेषंशिरोरोमाणिचसहैवनिदधाति।
नाणिचसहैवनिदधाशीर्षलोम्नामभावेन्मानिमेषशरीरसंबंधिरोमाणिगृहीत्वानिधेया
नि। तेषुसंनारेषुउपरिध्माग्निं निदधाति। तस्याग्नेरुत्तरतः। उत्तरवेदिरूपपर्येवाग्निसमिपे
उपयमनीर्निर्वपति। ततो द्विरासनं। प्रणीताप्रणयन। अलते चेन्नतः प्राज्ञग्रहणं। मध्य
मवर्जंपरिस्तरणं॥ पात्रासादनं॥ तत्रस्फाग्निहोत्रहवणीपवित्राणिसंत्येवऽशाम्याद्द ॥५॥
षडुपलामाज्यस्थालीआज्यंचवेदश्चदक्षिणार्थः। पश्चुर्धेनुर्वरोवा। अग्निः। इध्मचतु

शूर्पोश्रीयेस्य प्रोक्षी होत्र
वणीवज्रस्पासा

होत्रपाठ॰ कु॰ शास्त्राणि

ष्टयं बर्हिचतुष्टयं। स्रुवः स्रुकपंचकं। प्राशित्रहरणोपाने तनीमसकं। सृपाष्टकं उखापंचकं। मंथनच
तुष्टयं। इडापात्रीषडंवत्तं। अंतर्धानकटः। प्रणीपात्रं। तत्र इध्मचतुष्टये विंशति रिध्मकाष्ठानि। अर
त्निमात्रौ वयाश्रयणौ। काष्मर्यौ। तयोरेका विशाखा। अविशाखा द्वितीया। अरत्निमात्रे वारुणं
हृदयशूलं। स्वसशाखाश्चेति। बर्हिश्चतुष्टये। काश्मर्यमयास्त्रयः परिधेयः। काशमयः प्रस्तरः।
काशमूलये विधृत्यो अरत्निमात्रे॥ बर्हिश्चेति। स्रुकपंचके। जुहूद्वयं। उपभृद्द्वयं। ध्रुवाश्चे
ति॥ पान्नेजनीसप्तके। कलशः आपः षड्हिरण्यशकलानि दृषदाज्यार्थं दृषिउपाकरणे त
णं। मैत्रावरुणदंडः। तस्यैवेष्टनं। सृपाष्टके। सृपः चूरवालं। प्रथमशाकलं परवेष्टनं। आपः
यवाः। कुशमुष्टिः। सृपांजनार्थमाज्यं चेति॥ उखापंचके। उखा। असि। स्वरु। द्विगुणरशना।
एका द्विव्यामा द्विगुणा। अपरा त्रिव्यामा त्रिगुणा वेति। मंथनचतुष्टये। द्वे अरणी द्वे नर्तने
शाकले चेति। पूर्वं संस्कृता एव प्रोक्षणीरादाय पदे आयति पात्रप्रोक्षणं। असंचरे प्रोक्षणीर्नि

यानं। ऊ ऊटाहननं। आज्यनिर्वापवेदवंधौ यजमान एव करोति। आज्याधिश्रयणमग्नीध एव। अध्व
र्योः पर्य्यग्निकरणं। उदकोपस्पर्शनं। ततो वेदिखननं उत्तरपरिग्रहः। दक्षिणतपुरीषोद्वहनं। अ
नुमार्गनं॥ अग्नीधः प्रोक्षणीद्धारणं। ततस्फ्यामुद्यं यो ध्वर्य्योः प्रोक्षणी तानां पश्चात्प्रागेषः स्फोद
कप्रहारः। पाण्योः प्रक्षालनं। अपरेण प्रणीतास्फ्यासादनं। अग्नीद्धेः दिमाध्ये प्रोक्षणी तासाद्यप्र
णीतानां पश्चात्प्रागग्रमिध्ममासाद्य तस्योत्तरतो बर्हिः प्रागग्रमेवासादयति॥ ततपात्र संमार्गः। स्रु
वस्रुच स्रुवः॥ ततः स्तुवस्य मेक्षणासि संमार्गः। स्तैरेव मंत्रैः प्रथमं प्रतपनं। संमार्गः प्रतपनमिति। त
तो गुद्धाः। स्रुसमीवसाहोमहवन्याः। ततउपन्तृतः। ततः पृषदाज्यो मन्तृतः उपन्तृतः ततोक्षवा
याः। तत्क्षीप्राशित्रहसने। ततः पत्नीसंनहनं। आज्योद्वासनं पत्न्या अवेक्षणं वेदिमध्ये आसादनं।
आज्योत्पवनं। प्रोक्षण्युत्पवनं॥ आज्यावेक्षणं। ईक्षणं। तेवेद्यापात्राणि तरेदध्या सिच्यत त्रस्थाली ॥६॥
स्थमाज्यं निनयेत्। दध्यान्याज्यमानीयेन्यापस्तंब वचनात्। ततः पृषदाज्यसंयोजनं। ततो गु

ध्रुवासु पञ्चकृति च चतुर्गृहीते गृहीत्वा। पृषदाज्योपन्नतिज्योतिसीति पंचगृहीतं पृषदाज्यं गृह्णीयात्।
मंत्रस्तु सकृत्। त्रिर्वा। ततो ध्रुवायां चतुर्गृहीतं पृषदाज्यं गृह्णीयात्। मंत्रस्तु ग्रहणं। इध्मं विस्रंस्यान्य
त्परिध्यादित्रिकेपरास्लत्यकेवलस्येध्मस्य प्रोक्षणं। वेदिप्रोक्षणं। बर्हिः प्रतिगृह्य वेद्यामासाद्य
तस्य प्रोक्षणं॥ सशेषोमूलावसेकः॥ बर्हिर्विस्रंसनं॥ आश्ववालप्रस्तरस्य ग्रहणं। अग्रेणैसमर्प
णं। सेनहनं विस्रंसनं। दक्षिणवेदिश्रोणे निधानं। अन्यैरवछादनं। वेदिस्तरणं। त्रिवितंचद्द स
प्रदक्षा॥ ततः अलशाखास्तरणं। दक्षिणभागेत्तस्मीमेव। ततः समित्प्रस्तरादानं॥ आहवनीयक
ल्पनं। उल्मूकोद्दूहनं। कार्ष्मर्यपरिधिपरिधानं। ध्येस्वविष्टृतोस्तरणं॥ आश्ववालप्रस्तरस्तर
णं। अग्निन्यासं॥ पूर्ववत्तस्मीं अस्तिरासादनं। ततो जुह्वा। ततो वज्रोपयमहेणतल्लीवसाहोमहवन्याः।
ततउपन्नतं॥ ततपृषदाज्योपन्नतो ह्युतौव्यस्कपन्नत्यनेनैवासादनं। ततो ध्रुवायाः॥ ततः आ
ज्यस्थाल्याः। ततः पृषदाज्यस्थाल्याः॥ ततः आज्यस्थालीस्थमाज्यमासेन्यासादनक्रमेण जुह्वा

दिस्खुमान्यमालनते। ततः आत्मालंभनः॥ उदकालंभनः॥ ततोवेदेः पूर्वे भागे गत्वादेवस्यत्वेत्यभ्रिंगृ
हीत्वेदमहमिति यूपावटं परिलिखति। आहवनीयस्य पुरस्ताद्वेदिमध्यमर्द्धं अर्वहिर्वेदि यूपपं
चमासप्रमाणनिम्नमवटं खनति। उदको॰ प्राश्यांपोसद्वापः। तदग्रेण यूपं प्रांचं निदधाति। यू
पस्योपरिऊरामुष्टिं निदधाति। प्रथमशकलं चा युपाग्रमुत्तरेण चखालं निहदधाति। ततोक्रुय
वोसीति मंत्रेण यवानावपति। ततोदिवेत्वाप्रोक्षामिति यूपस्य मूलं। प्रोक्षणीशेषं सर्वं यूपावटे ति
नयतिशुंधंतामिति उदकालंभनः। पितृषदनमसीतिप्रागग्रा उदगग्राणि वबर्हिष्यवटे प्रक्षिपति
उदकालंभनः। ततोग्रेणीरिसीतिप्रथमशकलमवटे प्रक्षिपति। ततः आज्यस्थाल्याः स्रुवेणाज्यं
गृहीत्वावटं परिस्तिर्याव टमध्येत्स्रुमींजुहोति। इदं प्रजापतये। ततउत्थायपुरस्तात्परिक्रम्य यूप
स्यदक्षिणातउदङ्मुखउपविश्याध्वर्युर्वायजमानोवास्नोकिकेनाज्येनयूपमनक्ति॥ द्वितीया कंडिका॥ ॥१७॥
॥२॥ तत्र यूपायाज्यमानायानुब्रूहीति होतारंप्रेष्यति ततोवेदं सव्यनगृहीत्वादेनस्त्वेतिमं

त्रेणोपरवदेशावर्जितं सर्वं स्रुपमनक्ति सर्वतः। ततः चषालमंतब हिंष्या नेनेवमंत्रेणानक्ति॥
मंत्रावृत्तिः। ततोक्तं चषालं स्रुपस्याग्रे प्रतिमुंचति सुपिप्पलास्व इति। ततो स्रुपस्याग्निष्टादेशं सो
परे पुनरनक्ति देवस्त्वेति। ततः परिव्ययणादशो स्रुपं सर्वतो गृहीत्वाध्वर्युः परिव्ययणं पर्यंतं न वि
मुंचेत्। ततः उच्छ्रीयमाणायानुब्रूहीति होतारं प्रेष्येति। ततो द्यामग्रेणेति स्रुपमूर्द्ध्वं करोति। पा
त इति स्रुपवटमध्ये स्रुपमूलं प्रक्षिपति। यः पुनरक्तोग्निष्टादेशः स आहवनीयाग्नि मुखः का
र्यः। ततः सव्येनहस्तेन स्रुपं गृहीत्वा दक्षिणेनावटं पांसुभिः स्थरयति ब्रह्मवनित्वेति। ततो मैत्रा
वरुणदंडेनाप्यवटं सर्वतस्त्रिः पर्यषति ब्रह्मदृंह इति सकृन्मंत्रः। द्विस्तूष्णीं ततः समं कृमिरं कृ
त्वा तत्रोदकमासिंचति। ततो स्रुपमन्वारभस्वेति प्रेषः। ततो स्रुपेन्नकृत्वान्वारंभे यजमानं विष्णोः
कर्माणीति वाचयति। सम्ब्रवेति ब्रूहीत्येवं॥ ततो यजमानो विष्णोः कर्माणीति मंत्रं स्वरेण पठ
ति। ततश्चषाले विलोकयंतं यजमानं च तद्विष्णोरिति वाचयति। चक्षुरा ततमिति ब्रूहीत्येवं॥

ततो यजमानः तद्विष्णोरिति मंत्रस्त्वरेण पठति। ततः परिवीयमाणायानुब्रूहीति होतारं प्रेषयति। त
तास्त्रिगुणया त्रिव्याममयादर्भमय्या रशनया मध्यमनागे यूपं त्रिगुणं परिव्ययति। परिवीरसीति॥
ततो रशनेयूपे बध्वा अन्योन्य रशनाग्रौ तौ संसृज्यान्यतरस्यां सिचि अन्यतरस्याग्रं तं प्रवेशयति अथ
मध्ये मूलेऽग्रे समध्येवायमिति। ततोऽग्निष्ठादेशे मुत्तरेण रशनायूपं तेरासे अधोमुखं स्वरुमवगूह
ति दिवः सूनुरसीति। ततः उपावीरसीति पान्नेजनीमध्ये आसादितं तृणमादाय तेन तृणेनो पदेवा
निति छागपशुं स्पृशति॥ आलभन्ते॥ ततोऽग्निमंथनं॥ तत्रोग्नेर्जत्रमसीति शाकलादानं। ततस्तं
वेद्यामुदगग्रं निदधाति। ततो वृषणौ स्थ इति शाकलस्योपरि तत्कुशातरुणे प्रागग्रे निदधाति ततः
उर्वश्यसीत्यधरारणिमुदगग्रां तयोस्तरुणयोरुपरि निदधाति ततः आयुरसीति प्रमंथारणाज्य ॥८॥
स्थालीस्थासाज्ये स्पृष्ट्वा पुरूरवा इत्यधरारणितीर्थस्योपरि निदधाति। ततः केन चित्पंमंथं
रयित्वाग्नये मथ्यमानायानुब्रूहीतो होतारं संबोध्य। गायत्रेण त्वेति प्रति मंत्रं प्रदक्षिणं त्रि

8

मैथति । ततः प्रदक्षिणाप्रदक्षिणमग्निजन्मपर्यं मंथति । अग्नौ जाते जातो यानुब्रूहीति होतारं प्रे
ष्यति ॥ ततोऽनवतेन्न इति मथितमग्निमाहवनीये प्रक्षिप्य समिधमाधाय स्रुवास्याः स्रुवेणा
ज्यं गृहीत्वा प्रक्षिप्तस्याग्नेरुपरि अग्नावग्निरिति जुहोति । इदमग्नये ॥ उपाकरणमंथनयोः
संयुक्तयोर्विकल्पः ॥ ततो द्विगुणरशनाया द्विव्याममात्रया रशनया नागपाशं कृत्वा
पशोर्दक्षिणशृंगं संमुखं पाशं प्रमुच्य शृंगयोर्मध्ये बध्नाति कृतस्पृंत्वेति । एवं मस्तके पशुं च
न्नाऽदेवस्य त्वेति यूपे बध्नाति । तत्रेंद्राग्निभ्यां जुष्टं नियुनज्मीति ऐंद्राग्नपशुपक्षे । सूर्याय जु
ष्टमिति सौर्यपक्षे । एवं सर्वत्र ज्ञेयं । ततः प्रजापतये जुष्टमिति प्राजापत्यपक्षे । ततो ब्रह्म
न्हविः प्रोक्षिष्यामीति प्रैषः ततः ब्रह्मा प्रोक्षमिति । यज्ञमिति पठित्वा ॐ प्रोक्षेत्यनुजानाति ।
ततोऽद्भ्यस्त्वौषधीभ्य इति संस्कृताभिः प्रोक्षणीभिः पशुं प्रोक्षति ॥ इंद्राग्निभ्यां त्वा जुष्टं प्रोक्षा
मीति । ततोऽपां पेरुरिति प्रोक्षणीः पशोर्मुखे उपगृह्णाति ॥ ततः आपो देवीरिति पशुमध्यस्ता

दुद्दनाग्निदेवोउपोदूति॥ इतितृतीयकंडिका॥३॥ ततः अस्तुतं चेददत्रप्रतयग्रहणंकर्तव्यं॥ त
तोहोतृषदनकरणं॥ एहिहोतरितिहोतुरामंत्रणं॥ अग्नयेसमिध्यमानायेतिप्रैषः। सूतंत्वंनि
तिप्रैषः॥ इदमहंसप्तदशेनवज्रेणत्यवबाधनं। प्रतिप्रणावऽभिध्माधानं॥ एकस्याः परिशोधणं।
आहवनीयोपवाजनं॥ पूर्वाघारः। सप्रैषोग्निसंमार्गः॥ अंजलीकरणं। उत्तराघारमाघार्यस्रु
चौसंस्पर्शयत्नेवपशुसमीपेआगत्योपविश्यजुह्वासंतेप्राणइतिपशुंललाटेसमनक्तितत
समंगानीतिदक्षिणोत्तरांसयोरनक्ति। उन्नयनमंत्रावृत्तिः। ततः संयज्ञपतिरितिदक्षिणोत्त
रश्रोण्योनरक्तिमंत्रावृत्तिः। ततः स्रुकूसमीपेप्रत्यागत्यसंज्योतिषेतिस्रुवासमंजनं। स्रुचोर्नि
धानं॥ होतृवरणं पुनराश्राव्याग्निर्हदेवीनामितियजमानंहरणं॥ तन्वह्त्यंतेन। ततोध्वर्युः
स्तत्रैवोपविश्यमित्रावरुणायोस्त्वेतिमंत्रेणमैत्रावरुणायोदुंबरींदंडंयजमानंमुख्यमात्रंस ॥२१॥
मर्पयति। ततः संस्पृष्टाउपविशतः। ततोग्निर्होतेत्यकत्रोस्रुचावादायातिक्रम्याश्राव्याहस

मिध्म: प्रेष्येति मैत्रावरुणं प्रतिप्रेष: । एकादशप्रयाजाद्द्वितीयप्रभृति ॥ प्रेष्येति प्रेष: । चतुर्थसप्तम
दशमेषु समानयनं ॥ तत्र चतुर्षु प्राक् तास्त्वा गात्रनुमंत्रणानि च ॥ पंचमे ॥ इदं द्वार्भ्यः । पंचमानतत
स्यैन्यनुमंत्रणं ॥ एतद्देवानुमंत्रणं सर्वेषां । षष्ठे इदमुषासानक्ताभ्यां ॥ पं० सप्तमे : । इदं दैव्याभ्यां
होतृभ्यां पं० अष्टमे । इदं तिसृभ्यो देवीभ्यः । पं० नवमे इदं त्वष्ट्रे । पं० दशमे । इदं वनस्पतये । पंच
मदेशप्रयाजानिष्ठाशासहस्तं शमितारं प्रत्याहरणं शासमाहरेति । शास: । असि: । कटाग्निका
उत्तयपार्श्वेति कृत्स्नसामर्थ्यात् । न खलु इति हरिस्वामि: ॥ ततस्तेनाहृतमसिमादाय स्वरुं च स्रुव
मादाय तावुभौ जुह्वग्रे अनक्ता घृतेनानक्ताविति पशोर्ललाटे स्वरुं वसिष्ठामुपस्पृशति ततः स्वरु र
शनायां पाशरसेवा गुह्यस्य मित्रे असिं प्रयच्छं जे षां ते प्रज्ञाता अश्रिरमिति शमितारं ब्रवीति । तत:
स्रुवौ सादयित्वा वा तस्यो त्तरत: शामित्रार्थं पं च भूसंस्कारान्कृत्वा पुनरुल्मुकं स्वन मेवाधिकं करो
ति ॥ चतुर्थी कंडिका ॥ ४ ॥ तत: पर्यग्नये कुरुहीति मैत्रावरुणं प्रेष्यति ततोऽग्नीदाहवनीया
दुल्मुकं गृहीत्वा पश्चाज्यां शामित्रदेशास्तृपवात्वा लाहवनीयान्परितस्त्रि: पर्येति । ततउल्मुकं

शास्य त्रिरेव प्रति पर्येति ॥ अंते इतरथा वृत्तिः ततः शमिता पशुं कंठे बध्वा चात्वालोत्करावंतरेणानय
ति । अग्नीन्ध्रमेवोल्मुकमादाय पशोरग्रतो याति । प्रतिप्रस्थाता वपाश्रपणीभ्यां पशुमन्वारभते अ
ध्वर्युः प्रतिप्रस्थातारमन्वारभते अध्वर्युर्यजमानमन्वारभते । ततोध्वर्युः स्तृतायाः एव वेदेर्द्वे तृणे
आदाय आश्राओपप्रेष्य होतर्हव्या देवेभ्य इति मैत्रावरुणं प्रत्याह । ततो रेवति यजमान इति य
जमानं वाचयति । अध्वर्युः शामित्रे नातिक्रामेत् । ततोग्नीहस्ताद् अग्निमादाय शामित्रे स्थापयति ।
मथित्वेके । ततः शामित्रस्य पश्चात् द्वे तृणे गृहीत्वा तयोर्वेदितृणयोर्मध्यादेकं तृणं प्रागग्रमुपास्यति
10 वर्षीव र्षीयसीति । ततः शमिता तस्य तृणस्योपरि पशुं प्राक् शिरसि प्रत्यकि । रसं वोदक्पा
दं पातयित्वा मुखग्रहणेन श्वासरोधं कृत्वा मारयति ॥ ग्रीवामोटनेन वा तथा मारयेत् यथा मा १०॥
यमाणः शब्दं न करोति । ततोध्वर्युः प्रतिप्रस्थाताग्नीध्रश्चाहवनीयमभ्यावृत्योपविशंति । ततोध्व
र्युः संज्ञपयात गन्नित्ति शमितारं प्रत्याह । ततो वसाहोमहवन्यां सकृच्छीतमाज्यं गृहीत्वा स

मिन्त्सर्वैकमाहवनीयजुहोति। स्वाहादेवेभ्यइति। इदंदेवेभ्यः। ततोमृतेपशौशमितासंज्ञप्तः
पशुरितिआह। ततोध्वर्युः स्वेतांनुमुद्धत्नेमितिब्रूयात्। पुनर्वसाहोमहवनीयमेवस्थाप्यासंदं
दास्यंगृहीत्वासमिधं विनेवदेवेभ्यः स्वाहेतिजुहोति। इदंदेवेभ्यः। अनयोराकुस्योः परिपशु
व्यइतिसंज्ञा। अनयोरत्रविकल्पेनहोमः॥ ततोवपाश्रपणीस्यापपशुबंधनेपेयुक्तो। द्विगु
णरशनोचात्वालेप्रक्षिपतिमाहिर्भूरिति॥ ततः प्रतिप्रस्थातः पत्नीमुदानयेतिप्रैषः॥
पंचमीकंडिका॥५॥ ततः प्रतिप्रस्थातापान्नेजनहस्तांपत्नीगार्हपत्यस्यसमीपात्पशुंप्र
तिनपत्नमस्तआतानेतिवाचयति। ततः पत्नीपत्नु॥ समीपेउदङ्मुखीउपविश्यपशोः प्राणा
नद्भिः शोधयति। वाचंतइतिमुखं। प्राणंतइतिनासिकेमंत्रावृत्तिः। चक्षुस्तइत्यक्षिणामं
त्रावृत्तिः। श्रोत्रंतइतिकर्णौमंत्रावृत्तिः। नाभिंमेतइतिनाभिमेढ्रंतइतिशिश्नंपायुंत
इत्यपानेसर्वाण्यंगान्येकत्रकृत्वाचरित्रांस्तइतिप्रोक्षति॥ ततः पात्नेशेषेणाध्वर्युय
जन

जमानो सह पशोरंगान्यनुषिंचतः । मनस्तइति पशोमस्तके ॥ वाक्तइति जिह्वां । प्राणस्त
इतिनासिके मंत्रावृत्तिः । चक्षुस्तइति चक्षुषी मंत्रावृत्तिः । श्रोत्रंतइति कर्णौ मंत्रावृत्तिः ।
पर्त्रेकृरमितिसर्वांगानि । शमहोभ्यइति पशोः पुछदेशे सर्वं निनयतः । ततः पशुमुत्तानं
कृत्वाध्वर्युर्नाभिरग्रे आततृणमध्याये देकं अवशिष्टं तदग्रभागं निदधाति । ॐ ओषधइति ।
ततः स्वधितइति प्रस्तातयाद्वयोर्धाऽरयोर्मध्ये इयं अग्रेति कृत विकृया घृतात्क्या असिधा
रयाग्निनिधानं कृत्वा तस्ली छित्वा तृणाग्रे सव्यपाणोऽस्तला दक्षिणेन पाणिना मूलं छिंगु
लीकृत्वोन्नयतो रुधिरेणानक्ति रक्षसां भागइति । निरस्तइत्येकरे तत्तृणं प्रक्षिपति । उ
दकोपः । ततो यजमान इदमहमिति मंत्रा तेतस्मात्तृणं स्पोपरिति ष्टति । ततोऽध्वर्युः पशोरु ॥११॥
दराद्वपात्मुखिद्यद्यौस्त्वः पृथिवीस्त्व इत्यूहितेन मंत्रेणवपाश्रपण्यामन्वारब्धेतया
वाद्यायजमानेवपाश्रयण्यामन्वारब्धे तयावपयावपाश्रपण्यावाछादयति । घृतेनेति ।

ततोवपांस्थितांप्रतिप्रस्थात्रेप्रयच्छति।ततःप्रतिप्रस्थातावपांचात्वालेपश्चात्प्रशामित्रेप्रत
प्यचात्वालोत्करावंतरेणाहवनीयसामीप्येआगत्यात्तरतस्तिष्ठति।अग्निच्छामित्रातमेवोल्मु
कंगृहीत्वाचात्वालोत्करावंतरेणगत्वाहवनीयेप्रास्यति।ततोध्वर्युरपिचात्वालोत्करावंतरेणा
गत्यसव्यहस्तेकृतेतृणाग्रमाहवनीयप्रक्षिपति।वायवरितिमंत्रेण।ततःप्रतिप्रस्थातोत्न्व
क्तिष्टन्नाहवनीयेवपांप्रतप्यांतरास्तपाग्नीवपांहृत्वापरित्योत्तरवेदेर्दक्षिणतआसीनोवपा
माहवनीयास्योपरिधारयित्वाश्रपयति।ततोध्वर्युःस्रुवेणाज्यंगृहीत्वावपायाउपरिजुहो
ति।अग्निरास्यस्येति।इदमग्नयइतित्यागः।ततोध्वर्युःरेवस्तोकेभ्योनुब्रूहीतिमैत्रावरुणंप्रे
ष्यति।स्तोकानुवाचनेसमाप्तेश्रृतायांवपायांघृतावप्रचरेतिप्रतिप्रस्थाताध्वर्युःप्रत्याह।ततो
ध्वर्युर्वपायोत्तरस्यअस्त्रिचारंकरोति।ततःप्रतिप्रस्थातांतरास्तपाग्नीवपोप्रत्याकृत्याहवनी
याद्दुत्तरतोनिदधाति।ततोध्वर्युर्यस्तेप्राणइतिइदंप्राणीगच्छेतिप्राणदानेकरोति।ततोच

पांप्रियेणधाम्नेत्यासाद्यध्रुवाअसदन्नित्यालभते ॥ आपस्तंबस्तत्रैववपांदक्षिणतएवनि
त्यादक्षिणेवेदिश्रोण्यांबर्हिषिप्लक्षशाखायांवपायाआसादनमुक्तं ॥ कठस्तत्रैतदंगयेषु
दर्शेषु ॥ ततोहोत्रापुनःस्त्रुगादापनेपठितेअध्वर्युर्जुहूपभृतावादायातिक्रम्याश्राव्याह
स्वाहाकृतिभ्यः । प्रेष्यतिउत्तमप्रयाजंप्रेष्यति ॥ इदंस्वाहाकृतिभ्यः एवंचममैतत्तनुमंत्रणं । प
त्तमप्रयाजशेषेणध्रुवैंक्रवामभिधारयति । ततआज्यस्थाली । ततोवपां ततः पृषदाज्यस्था
लीततःपृषदाज्योपभृतं । ततआज्यभागौप्रेष्यप्रैषौ । अग्नयेनुब्रूहीतिमैत्रावरुणंप्रेष्य
12 तिअग्नयेप्रेष्यति अग्नयेप्रेष्यतिच ॥ इदमग्नये । सोमायानुब्रूहि । सोमायप्रेष्य । इदंसो
माय । ततोजुह्वामुपस्तीर्यहिरण्यशकलमवधायवपामवद्यमैत्रावरुणंप्रत्याह । इंद्राग्नि
भ्यांछागस्यवपायोमेदसोनुब्रूहीति । पंचवपास्कन्नमवधायपुनरुपरिहिरण्यशकलमव ॥१२॥
धायोपरिष्टात्सकृदभिघार्योद्यायातिक्रम्याश्राव्येन्द्राग्निभ्यांछागस्यवपामदःप्रेष्यतिमै

त्रावरुण प्रत्याह । होत्रावषट्कृते समिद्धे जुहोति । इदमिन्द्राग्निभ्यां । ततो वपाश्रपण्यौ मैध्य विशा
खां प्रागग्नौ । अविशाखां प्रत्यागग्रां कृत्वा उत्तरतः क्षिप्त्वा आहवनीयं प्रति स्वाहाकृते ऽकुर्वी
नन्न समितिमंत्रेण । ततः स्रुचौ स्वस्थाने आसादयति । ततो ब्रह्मादिक्रमेण सर्वे सयजमानाः स
पत्नीकाश्चात्वाले मार्जयेत् । इदमापः प्रवहतेनेनावच । नात्यत्याज्ञ अपि मंत्रः । क्वचिद्धर्म्मीमितियत्मा
न्नू ॥ हिरण्यशकलस्यात्पेनाभावे हिर्हिरूपस्वाहा त्निद्यारौकार्या वित्याश्वलायनब्राह्मणे ॥ षष्ठीकं
डिका ॥६॥ ततः पशुपुरोडाशस्य निर्वापः । तत्र पूर्वं यजमानेवाचंयच्छेति प्रैषः ॥ पात्रासादनं ॥ उ
लूखले मुसले । पात्री धान्यं । व्रीहिः संयवनोदकं । घृतावदानं । पुरोडाशपात्री । कर्मापवर्गा समि
द्धा ॥ ततः पात्रांतरे प्रोक्षणी रुकीयमन्यर्याग्निहोत्रहवण्यो रादानादियहणं सादनांतं । इंद्राग्नि
भ्यां जुष्टं । पात्रांतरे स्थिताः प्रोक्षणीः स्रुचि निनीय ब्रह्माणं पृष्ट्वा इंद्राग्निभ्यां त्वा जुष्टं मिति
हविः प्रोक्ष्य पात्राणि प्रोक्षति । निःशेषकरणं । ततः कृष्णाजिनादानाद्याप्रोक्षणोदकनिनयनां

ते । ऊरु उपावाहननवेदवेधाज्यनिर्वापतदधिश्रयणानामभावः ॥ ततः स्रुतावदानपुरोडाशपात्र्यो
संमार्गः संमार्जनतृणापासनं च । ततः पुरोडाशविभजनमीकरणाद्यालेपनान्ते । प्राशित्रदाने इंद्रा
ग्नी गच्छेति विशेषः । ९ ते ८ होतृमैत्रावरुणावित्थामंत्रणं शंस्यायनेस्तत्रात् । ततोऽजुहूपस्त
तावादाय जुह्वामुपस्तृति चोपस्तीर्य पुरोडाशमवद्यन्मैत्रावरुणं प्रत्याह ॥ इंद्राग्निभ्यां पुरोडा
शस्यानुब्रूहीति । ततो द्विरव... दायोपरि सकृदभिघार्य अवदानयोः प्रत्यभिघारः । ततः उ
त्तरार्धादुपस्तृति स्विष्टकृदर्थमवदानं । ततो द्विरभिघारः । उत्क्रायातिक्रम्याश्राव्य मैत्राव
13 रुणं प्रेष्यति । इंद्राग्निभ्यां पुरोडाशं प्रेष्यति । इदमिंद्राग्निभ्यां । ततः उपस्तृति यदवदानं ते जु
ह्वां समानीयाग्नयेऽनुब्रूहीति । अग्नये प्रेष्यति मैत्रावरुणं प्रेष्य वषट्कृते जुहोति इद
मग्नये । एवं निर्गुणः स्विष्टकृद्यागः कर्तव्यः । उदकोपः । एतस्मिन्स्तोभोत्सादनं । नात्र संचरा ॥ १२ ॥
स्कन्दनं । चतुर्धाकरणभागवर्जं । सोऽयं प्राजापत्यपशुभागपरिहृणं ते सर्वं । मैत्रावरुणा

प्यत्रेऽनुक्षयति । ततो दक्षिणादानं । तत्र पशुरसीति धेनुरसीति वा वरोऽसीति वालं ननेविशेषः । उ
र्गसीत्यस्य स्थाने । अस्य पशोः समृध्यार्थं पशुं दक्षिणा धेनुं वरं वा ब्रह्मणे होत्रेऽध्वर्यवे मैत्रावरुण
यति प्रस्थात्रेऽग्नीध्रे च सम विभागेनाह संप्रदद ॥ ब्रह्मन्यस्तेनागरत्यादि । ब्राह्मणोऽयं वः पशुः
प्रतिगृह्णीत । ततोऽनंकोयाऽसिंधारया पशु विकर्त्तनं शमितुरेव । नाध्वर्योः । हृदयादि मांसोन्म
वखण्डयेत् स्वधितिना पशुशरीराद्ग्रहणं । हृदयं आम्रफलाकारं मांसं । जिह्वा प्रसिद्धा । क्रोडं व
क्षोऽनुयजोरंतरालमित्यर्थः । सव्यसक्थि पूर्वनडकमिति सव्यबाहोः पूर्वनडकं प्रथमानलिका ।
अल्पसन्निकृष्टा ॥ पार्श्वे वामद   क्षिणे त्रयोदशा त्रयोदशास्थि संबंधे । कक्ष्मकाले यं पित्ताधा
रस्वरूपं यकृत् । वृक्कौ पक्वाम्रफलतुल्यौ ऊरुसो वर्त्तमानौ गोभकौ । गुदमांसं सकलं रज्जुसदृशं ।
दक्षिणा श्रोणिः दक्षिणस्य पश्चात्पादस्य । परिवर्त्तमानो मांसलः प्रदेशः कटिशाद्व्यंवोः ।
एतान्येकादशाऽवदानि । ऊदु कूसबंधिनि । प्रधानयागसाधनानित्यर्थः । ततो दक्षिणसक्थि

दे.व.प. १४ स्त्र्वेनउर्कंउक्षिणाबाहुको ःप्रथमानलिका । गुदत्रतीपाणिष्ठं गुदस्य तृतीयभागो ः । सं श्रोणिसप मा
स्यपश्चात्पदेस्योपरि सासलः प्रदेशः कटिशब्दवाच्य ः । एतानि त्रीण्युपस्थसंबंधीनि स्विष्टकृद्या
गसाधनानि । गुदस्य वर्षिष्ठो भागउपष्ठो मार्थः । गुदस्य विभागइदानीनकार्यः । गुदका सर्वदानल्से वि ४
त्रिधा विभज्यते । ततो वनिष्ठुः स्थूलांत्रं । जाघनी पशोः पुच्छं । क्लोमं गलनाडिका । प्लीहं शु [illegible]
काकारं मांसं । अध्यूध्नी शातपुटः । पुरीततं हृदयस्य प्रच्छादकं मांसं । एतानि क्लोमादीनि वि
14 कल्पेन गृह्णीति । यदि पशुः स्थूलो भवति तदा यद्वरिष्ठं उदरमेदे वपाग्रहणकाले स्समन्गृ
तसदृशं श्चैतं मांसं तदुदे आंत्रमध्ये अवगृहेत । एवं हृदयादीनां ग्रहणं कर्तव्यं । ततः शामि
त्रस्य पश्चादुत्कराद् उत्तरतो गर्त्तं खनते पित्वातास्मिन् गर्ते ऊवध्यं पशोः पुरीषं तत्रैव अवधाय तत्
स्योवध्यस्योपरि रक्षसां मिति लोहितं प्रक्षिपति । इदं रक्षो न्यइति भागः । उदकोपः । ततो घो
रसीति मूलमादाय यजमानन्वारब्धे मूले । हृदयं प्र हृद्योनन्वारब्धे शामित्रे प्रपयति । शामि ॥१४॥

त्रेग्नौ ताप्यमानेनैव। ततो घ्यो रसीत्कषामादाय मते रिश्वन इति शामित्रग्नौ अधि श्रयति॥ ततो
यजमानेनान्वारब्धायामुखं वाषायां हृदयादीनि मांसानि कुम्भेण प्रक्षिपति। ततोनन्वारब्धे उदकं
प्रक्षिपति॥ ॥सप्तमी कण्डिका॥७॥ ततः शमितारं शास्त्रिशिक्षयति। त्रिः प्रज्ञापयतादिन्ना
दिनान श्रृतं हीयं तेना। ततस्त्रिः प्रच्छते पशौ त्रिरुक्ता लिते शमिता हृदयाश्शूलाग्निं निष्कारय
षाउपरि स्थापयित्वा मूलमध्वर्यवे प्रयच्छति। अध्वर्युः शूलं स्वमेयामेस्यातिरिक्ते प्रदेशे स्था
पयति॥ ततो मांसे पुश्टे तेषु अध्वर्युर्जुह्वां पंचगृहीतशोषं पृषदाज्यं हृदयाभिघारणयोग्यं
गृहीत्वा चात्वालोत्करावंतरेण निष्क्रम्य पृच्छति श्रृतं हविः शमिता २ रिति त्रिरनिक्रम्य श्रृ
तामिति ऽप्रोक्ते शमित्रा। तद्देवतामित्यपां श्वध्वर्युराह। ततः पुनः शमितारं प्रत्यनिक्रम्य तथैव
पृच्छति। पुनः श्रृतमिति प्रत्युक्ते तद्देवानामिमां श्रुत्वा पुनरपि शमितारमनिक्रम्य तथैव पृ
च्छति। श्रृतमिति प्रत्युक्ते तद्देवानामित्यपां श्रुत्वा पुनरपि शमितारमनिक्रम्य तथैव पृच्छति।

श्र तमिति मन्त्रके तदेवानां मित्यपां श्चध्वर्युराह ततस्तेन प्टषदाज्येनाध्वर्युः सर्वमांसानामुपरि
स्थापिते हृदयं संते मनइ त्यभिधार्यते पृषदाज्येन सर्वेय श्चवदानान्क स्वास्थि तान्कभिधार
यति॥ अथवा हृदयम्वतिरिक्तं सर्वसाज्यस्थाल्याः स्त्रवरणाज्यंग्र हीत्वा तेनाभिधारयति। उ
नयम प्यतस्मन्नलेग्नतइ श्यानुष्टानं। ततउ खामुदगुद्वास्य मांसानि निष्का स्यवंशपात्रादौ
क्वचिद्विपुलेपात्रे उदक्संस्थानि स्थापयति हृदयादशसंख्यानां दिक्रमेण। ततोवशां निष्का
श्यपात्रांतरे कृत्वा स्थापयति। ततः स्थाल्याज्येन हृदयादीनामेकादशसंख्यानां प्रत्यकं प्राण
दानं॥ इंद्रासीगच्छे तिमंत्रेण॥ वसायास्तुस्ती॥ ततः पशुमांसानि त्रसिं चादाय चात्वालोत्क
शवंतरेण। गत्वास्थपात्र्यो रंतरालेन मांसानि हृत्वास्वयं सह विद्वा तथैवात्वास्तस्योदक्षिण
प्रदेशेवेद्याव र्हिषिकुदयादि निजोहवा निप्रत्येकभियणाधाम्नेति सादयति। जोद्यनीचमं ॥१५॥
त्रेण। ततोवसायास्तस्तीसादनं ततोजोहवानामेव प्रत्येकं जावन्याश्च लक्षवाश्रसदं नि

त्या लं तत्र वसायास्तस्मिं श्चंगर्नो गावेदानानां बर्हिषि स्थापनमात्रमेवनासादनासन्नौ । नात्मास
नः स्रुतत्वात् ततो जुहूमुपस्तृणाति वसाहोमहवन्यां प्राशित्रहरणेडापात्र्यां चोपस्तीर्य जुहू
मुपस्तृणाति च हिरण्यावधानं । ततो मनोतायै हविषोवदीयमानस्यानुब्रूहीति प्रैषमैत्रावरुणं प्र
ति । ततः प्रतिप्रस्थाता स्रुतीनां प्लक्षशाखानामुपरि मांसान्यवखंडयति । हृदयादीनां जो हवा
श्वा नो प्रत्यक्षमर्धांत्सर्वाङ्गा च द्विर्द्विर्वरदायाध्वर्योर्हस्ते समर्पयति । अध्वर्युर्जुहूमवदधाति । गुद
स्यावदानकाले विषमस्त्रेधा विभागः कर्तव्यः । प्रथमः स्थूलो महान् भागः उपयद्भ्यो मार्गः ।
द्वितीयो मध्यमो नातिस्थूलो नातिकृशो । स जुह्वां विधातुं त्वावदेयाः तृतीयो ह्यणिष्ठोपि अणि
ष्ठोऽतिस्थूलः । अंगे स्विष्टकृदवदानानेषु स्थाप्यः । एवं जुह्वामवदाय । तत उपस्तृणाति दक्षिण
सं छि गुदतृतीयसव्यश्रोणीनां द्विर्द्विर्वरदानं । गुदतृतीययोर्निःशेषयोरेवावदानं । जुहूम
पस्तृतान्क्रमेण हिरण्यशकलवावधाना । ततो जुह्वा सस्कृदभिघारः । उपस्तृणाति सस्कृदेवाभि

घारः। पञ्चावत्तिनां सर्वावदाने मध्यात्। स्विष्टकृदवदाने मध्यात् सर्वार्द्धात् पश्चाच्च॥ त्रिर्जमदग्नीनां पश्चात्
तीयमिति वचनात्। उपस्तरणाद्यवदानाभिघारणाद्यावस्यं चावत्तं संपादनीयमिति शास्त्रदी
पिकायां। ततो रेडसीति वसाहोमहवन्यां यथाकचैथं द्वसाग्रहीत्वा उपरि द्विरभिघार्य पार्श्वेना
सिनावाव सो घृतं च मिश्रयति प्रयुतमिति। ततो जौहवस्नो हृदयादिभ्यः प्राशित्रावदाने।
तस्याभिघारः। ततो वसाशेषमिडापात्रीमासिच्य तत्र हृदयजिह्वाक्रोडं यकृद्वृक्कौ यताभिसम
ग्राण्येव प्रक्षिपति। तद्धृदयं प्राश्नातीत्येवं समग्राणामेव प्राशनश्रवणात्। वनिष्टोरुपलक्षणार्थ
त्वात् शाखांतराच्चेडावदानान्यपि सर्वाणीडापात्र्यां निधेयानि। वनिष्टुत्यातिरिक्तानां द्विर्द्विरव
दानं वा कार्यं शाखांतरेण। इडामवद्यतीति श्रवणात्। उपरिष्टात् द्विरभिघारः॥ ततो जाघ
नीं पत्नीसंयाजार्थं गुदं तृतीयमुपयड्ढोमार्थं किंचित्स्थूलगुदे शे निधाय पेड्ः प्राणदिति अवशिष्टा
निमांसानि अवमृशति। अपक्वे त्वयत्नत्वगादि पशुशरीरं तदग्निमृशतीति हरिस्वामिनः। ॥१६॥

16

पद्यैमांवसानोप्रतिपद्यते ॥ ततस्तत्रोपविश्य ऐंद्राग्नेस्यां छागस्य हविषोनुब्रूहीति मैत्रावरुणं प्रे
ष्यति ॥ ततउत्थाय अतिक्रम्याश्राव्यैंद्राग्नेस्यां छागस्य हविः प्रेष्यति मैत्रावरुणं प्रेष्यति । ततो या
ज्याया अर्द्धर्चेति प्रतिप्रस्थातोत्तरतः तउपविश्यपवसैकादेशं जुहोति घृतं घृतपावान इति मंत्रेण
इदमंतरिक्षाय ततोध्वर्युर्जुह्वा वषट्कृते जुह्वा वदानानि जुहोति । इदमैंद्राग्नेस्यां । ततः प्रद
क्षिणमावृत्य जुह्वा पृषदाज्यस्थाल्याः पृषदाज्यग्रहणं कृत्वा वनस्पतयेनुब्रूहीति मैत्रावरुणं प्रे
ष्यति । इतथावृत्तिः । अन्नात्सवनस्पतये प्रेष्यति मैत्रावरुणं प्रेष्यति ॥ इदं वनस्पतय इत्यग्नेउ
त्तरतो जुहोति । वनस्पतिः स्विष्टकृद्विकारः । इति मध्यमस्वरेणु प्रैषाध्युच्चारणा ततउपस्त
तोवदानीति जुह्वामानयमानोग्नय स्विष्टकृतेनुब्रूहीति मैत्रावरुणं प्रेष्यति । ततआश्राव्या
ग्नयस्विष्टकृते प्रेष्यति । इदमग्नये स्विष्टकृते ॥ उत्तरार्द्धहोमः ॥ उदर्शकस्पर्शः । ततः स्रुचौ स
मेत्य तोपविश्यपउत्तरतः वसाहोमहवन्यावसाशेषेण दिशोत्याघायति ॥ दिशः स्वाहा ॥

अग्ने पूर्वतो गे इदं दिग्भ्यः। प्रदिशः स्वाहा। दक्षिणतः। इदं प्रदिग्भ्यः। आदिशः स्वाहा पश्चात्। इदमा
ग्भ्यः। विदिशः स्वाहा उत्तरतः। इदं विदिग्भ्यः। उद्दिशः स्वाहा मध्ये। इदमुद्दिग्भ्यः। दिग्भ्यः स्वाहा
पुनः पूर्वार्द्धे सर्वस्वव्रतोपस्थहोम। इदं दिग्भ्यः। ततः प्रत्यागत्य स्वस्थाने स्रुक्स्रुवयोः सादनं॥ अष्टमी
कंडिका॥ त॥ अत्रचापेंद्रः प्राण इति पशुसंस्पर्शनं॥ संचरास्कन्दणं। प्राशित्र समर्पणं। उदको
पः। इडासमर्पणं। दक्षिणाति क्रमं। इडां प्रतिगृह्य पर्वीजनं अवांतरेडावदानं। पुनः इडासम
र्पणं। नाग समर्पसमर्पणं यजमानः करोति। ब्रह्मणो अध्वर्यु होत्रे। पुरीततमघवे
वनीक्षुमग्नीधे। श्रीहं यजमानाय अध्वर्युः समर्पयति। ततइडा नक्षः। ब्रह्मादिनां च यथास्वं
मैत्रावरुणं प्रतिप्रस्थाता रो उडां नक्षयततः। ततः सर्वेषां ब्रह्मादि क्रमेण मार्जनं। पवित्रं प्र
तिपत्तिः। ततउल्मुके समस्यानुयाजार्थं परिशोषितमिध्मकाष्ठमादाय अग्निदेपयजानंगा ॥१७॥
रानाहरेत्यग्नीधप्रेष्येति। ततउपयष्टरुपसीदेति प्रतिप्रस्थातारं। ततो ब्रह्मन्प्रस्थास्या

17

मीति ब्रह्माणं। ततः समिधमाधायाग्निमग्नीसंमृड्ढी त्यग्नीधं। ततोऽग्नीत् वैशामित्रात्ख
ड्गन्नङ्गारान् ज्वलतं आहृत्योत्तरस्यां वेदिश्रोण्यां परिसमूहनादिसंस्कृतायां निवपति॥
ततः समिधमाधायाग्निसंमार्ष्टि। प्रतिप्रस्थाता गुदमादाय श्रोणिसपेउपयद्धोमार्थमुपवि
शति। ततोऽनुयाजेषु ह्रियमाणेषु गुदखंडं छित्वा छित्वा प्रतिवषट्कारमेकैकं हस्तेन जुहोति।
समुद्रं गच्छेति प्रतिमंत्रं तेषामनुयाजत्यागानंतरं त्यागः॥ इदं समुद्राय। इदमंतरिक्षाय।
इदं देवाय सवित्रे। इदं मित्रावरुणाभ्यां॥ इदमहोरात्राभ्यां। इदं छंदोभ्यः इदं द्यावापृथिवी
भ्यां इदं यज्ञाय इदं सोमाय। इदं दिव्याय नभसे। इदमग्नये वैश्वानराय। ततो मनो मइमु
खं विन्चष्टे। उपस्थशतित्यर्थः। अध्वर्युः पृषदाज्यापन्ते ततः पृषदाज्यं समानीय जुह्वां पृष
दाज्योपन्ते तावादायाति कस्मा आश्रावय देवेभ्यः प्रेष्यति मैत्रावरुण प्रेष्यति। एकादशानु
याजाः। चतुर्थसप्तमदशमेषु समानयनं। प्रथमेऽनुयाजो इदं देवाय बर्हिः द्वितीय इदं दे

वीस्योद्वास्यः। तृतीयइदंदेवीभ्यामुषासानक्ताभ्यां। चतुर्थेइदंदेवीभ्यांजोष्ट्रीभ्यां। पंचमे
इदंदेवीभ्यामूर्जाहुतीभ्यां। षष्ठेइदंदेवाभ्यांदैव्याभ्यांहोतृभ्यां। सप्तमेइदंदेवीभ्यस्तिसृभ्य
स्तिसृभ्योदेवीभ्यः। अष्टमेइदंदेवायनराशंसाय। नवमेइदंदेवायवनस्पतये। दशमेइ
दंदेवायबर्हिषे॥ एकादशेइदंदेवायाग्नयेस्विष्टकृते। प्रथमस्यवह्नेः सर्वभागेहोमः॥
18 द्वाभ्यन्त्रतिनानाशास्त्रांसमर्थेतानामेकस्मिन्स्थानेमध्यहोमः। ततस्त्रयाणामेकत्रयश्चाहु
गेहोमः। ततोऽपस्पृश्योत्तरतउपविश्यसमानीयदेवेभ्यः। स्वाहेतिप्राचीमाहुतिं। जुहोति।
यूपोत्पाटनं। ततोदिवंतेधूममितिजुहुयात्स्वरुंजुहोति। इदंस्वरवेइतित्यागः। ततः स्रुचा
वासाद्याज्योपन्ततः उपरिष्टपदाज्योपन्ते निधायवसाहोमहवनींजुहुयात्उपरिनिधायच
वस्नन्तहति। इदग्म्नोवेनस्पतेरुद्रितिमितिजुहुयात्। इंद्राग्नीवनस्पतिस्तमपन्तुदंत्वितिउ ॥१८॥
पन्ततः। ततोऽजुहुयात्उपन्ततोवाप्नकस्यपरिभ्यंजनं। स्तकेवाकायस्तकामेभ्येतिमेत्रवरुणं

प्रतिस्त्रुक्‌बाकेप्येषः। ततः प्रस्तरादानादिधुरितिधुनां ते विशेषः। प्रस्तरमध्यस्योपंचहूयं
जनेः सर्वाग्निः। स्रुग्भिः संस्रवहोमः॥ घृताद्यस्कुंडुध्रुवायांधातस्तुन्वास्कस्तुन्वमाधवेत्स्तहृः ते
तोवेद्यास्तेनः। ततोवत्रेहोता। स्रुगसीत्यध्वर्युः। जाघनीमग्नीदादायपत्नीसंयाजार्थी
गार्हपत्यंगच्छति। तत्र सोमयागेतत्पयागेव जाघन्याउपरिभागादेव चतुरवत्तंदद्यात्। त
तीययागेऽत्रानायाजादेन्याग्रं तः प्रदेशाच्चतुरवत्तयेत्॥ इडापि तत एवावदेया। पुनर्जा
घनीपर्यावर्त्य वोस्तुर्वीततोपरिभागादेव गृहपतियागार्थं षडवत्तार्थं चावदयेत्॥ पत्नी
संयाजेषुनोपस्ताराभिघारो॥ जाघन्या एवावदानं चतुष्पयस्यप्रतियागंग्रहणं॥ ततउत्ता
यं पत्नीसंयाजेषुनोपस्ताराभिघारो॥ जनायद्‌इडांपं चावत्ताकृत्वा समर्प्यप्रतिगृह्यपेचा
वत्तामेवावीत्नरेडांसमर्पयत्॥ नात्रपर्वाजनं। इडाम्तगृहएवस्यविधानात् इडायांचा
ज्यानावात्। अन्वारंभः नस्तः। मार्जनं। नादब्याकृतिः। नशंयोर्वाकः। अदब्याकृत्यनावपि

संयोर्वा कोनवतीतियाज्ञिकाः॥ सव्येनावृत्स्यद्‌क्षिणाग्निहोमः॥ तत्रेदमिंद्राग्निस्यामितितृती
यस्यत्यागः। ततोवेदयोक्त्रविमोकः॥ आवेदेस्तरणं। त्रीणिसमिष्टयजूंषि विष्णोर्वाजेनक्रावये
वध्रियाहेजुहोति॥ देवानाउविदइतिप्रथमं। इदंवातायपज्ञामितिद्वितीयं। इदंपर्जन्याय। एष
तेयज्ञोयज्ञपतइतितृतीयं। इदंयज्ञपतये। अथवायां। आवाहइत्यादित्रिस्त्रीणिसमिष्ट
यजूंषिजुहोति। अत्रइदमग्नयइतिद्रोत्यागो। तृतीयप्रस्तुतिवत्॥ नवमीकंडिका॥९॥॥
ततोबर्हिर्होमः। ततोहृदयशूलमादायतडागादिस्थमुदकंप्रतिसर्वेगच्छंति। तत्रगत्वा
19 ध्रुवंधुरस्यवेत्यापःप्रविश्यशुष्कार्द्रसंधौशूगासितमितिमंत्रेणमंचेत्संतेनहृदयशूलमुपगू
हती। यन्मौप्रवेशयतित्यर्थः। ततः सर्वेसुमित्रियानइत्यप्निमंत्रयंते। उपस्थशांतिर्वातत ॥१२॥
डागादिगमनेग्लानिश्चेतत्रपात्रस्यैवदेशेउदपात्रंनिनीयतत्रशुष्कार्द्रसंधौशूलमुपगूहे

शाता सम्मेवापामग्निमंत्रेणं उपस्पर्शनं वा । ततो यजमानः प्रत्यागत्य तीर्थेन गत्वा । देवानां समिद
सीति आहवनीये समिधमादधाति । पत्नी च गार्हपत्ये तत्स्थां समिधमादधाति । ततः प्रणीताविमो
कः । राक्षसभागः । पूर्णपात्र निनयनाद्याहवनीयोपस्थानांते ॥ अत्र वा अश्वसादानादि समिदाधानां
तः पूर्ववच्छ्रयः । तत उत्तरवेदेः स्वात्र छित्वा व्रतं विसृजेत् ॥ ततो ब्रह्मयजमानौ मध्यमाहवनी
यसमीपे उपविशतः । ततोऽध्वर्युराज्यं संस्कृत्य चतुर्गृहीतं गृहीत्वा समिधमादाय गत्वा मध्यमा
हवनीये परिस्तीर्य समिधमाधायोरु विष्णविति जुहोति । इदं विष्णवे । ततो यजमानोऽध्वर्यवे यस्य
दार्शि याक्तिर्भवति तद्द्रव्यमिष्टाप्रमाणं ददाति । अस्मा आहूते समः । अध्वर्य इदं द्रव्यं दक्षिणामध्वर्यो नु
न्य महे संप्रददे । नित्यधारणपक्षे मध्यमाहवनीयं दक्षिणाग्नौ उद्धरेत् । इतरोऽसौ लौकिकः । अथवा
मध्यमाहवनीयं समारोप्य निर्मथ्य तत्र तामाहुतीं जुहुयात् । होमान्ते स लौकिकः । ततः प्राजापत्य
पक्षे से. यं रत्न ब्रह्मयजमानयोर्नीगमप्राशनं । ततो ब्राह्मणतर्पणमेषः । एकस्मिन्पर्वते एणं ॥ ततो ब्रह्मा

ननमः स्वतायेतिहोमसमिदाधानोपस्थानामन्यतमत्करोति। ततोजलमध्यसुप्रोक्षितादिकृत्वा
तब्राह्मणभोजनसंकल्पंयजमानः करोति अस्य निरूढपशोः समृद्ध्यर्थंयथासंपन्नेनान्नेनतद्दक्षिप
र्येतभोजनपर्याप्तेनशतंब्राह्मणानहंभोजयामिइति। सोयंपशुपक्षेपशुपुरोडाशोष्टाकपालः श्रा
णीयस्यपशुपक्षेच। प्राजापत्यउपांशु। अन्यत्प्रैषादिकमूह्यं। पयोद्रोदीनामाविकल्पइतिकेचित्
नेत्यपरे॥ ॥इति श्रीयाज्ञिकदेवकृतायांकात्यायनसूत्रपद्धतौनिरूढपशुबंधः॥ ॥अथसूत्र
कमोद्दर्विहोमाणांधर्मालिख्यते॥ दर्विहोमेषुशतरुद्रियादिषुइष्टप्रैषोर्णमासधर्मानवंति।त
त्रैवैकस्मिन्नेवाग्नौआहवनीयस्थानापन्नेपरिश्रितादौवाहोमोनगार्हपत्यदक्षिणाग्नौवा।हवि
श्रपणप्रतपनादयःसंस्कारास्तुगार्हपत्येकर्तव्याः।तत्रप्रयाजानांअनुयाजानांइध्मकाष्ठानां स्वि
20 ष्टकृदिडाप्रस्तरहोमानांचभावः॥उत्तराघाराज्यभागसंस्रवबर्हिरादयोहोमाश्चतुर्थ्यंतदेवता ॥२०॥
पदमुच्चार्यस्वाहाकारेणकर्तव्याः।एवमग्न्याधानादारभ्यकर्मापवर्गांतंमंत्ररहितंसर्वंकर्मतेषुन

भवति प्रतिषिद्धवर्ज्जं । दर्विहोमाः परं तत्रैवोक्ताः । यथा वाजपेये वाजप्रसवीयहोमः । साक
मेधेषु पूर्णादर्विहोमः । सांतपनीया तंत्र मध्यस्था तपस्ते । सौत्रामण्यां त्रिपशुषु पयोहोमाद
यस्ते होममात्रा भवति । तेषुस्मेन्चाधानाद्यारादुपकारकमंगजातेन भवति । संनिपत्योपका
रकं तु द्रव्यसंस्कारादि भवत्येव । यथा वाजपेये वाजप्रसवीयहोमे तु प्रधानामासादनप्रोक्ष
णादि पयसः पशुगोपाकरणादि इति जुहोति धर्माः । अथ पाकयज्ञे पशुस्मार्तेषु पशादिश्रा
वणाकर्मादि पशुस्कंधादौ होमार्थमवत्तस्य घृतं चर्वादेः सर्वस्य होमो न कर्त्तव्यः । किंतु किंचिद
वशिष्य प्रत्याहुतिपात्रांतरे स्थापनीयं । ततस्तं चोपदिष्टान् सर्वान् होमान् कृत्वा अनंतर
मेव तस्याहुतिशेषस्य प्रत्याहुतिपात्रांतरे स्थापितस्य होमः कर्तव्यः प्राशनं कर्तव्यः । निरूढपशु
षु अग्नीषोमीयात्पशोः सकाशाद्धर्मा भवंति । अन्येषां पितृत्वनूत्पादीनां भाष्यकारेणा
मते सवनीयाद्रवं वा धे निरूढपशुत्रिषु एव पशुष्वग्नीषोमीयधर्माः । इतरे पशुचातुर्मास्यादिप
शु

शुष्कव्यतिरिक्तेषु निरूढधर्मा इति ॥ अथ प्रसंगात् स्मार्त्तपशुषु केचित् धर्मा उच्यन्ते । स्वप
स्थाने पशुनियोजनं शाखायां भवति । वपाहोमानंतरं । हृदयादीनि त्रीण्येवावदानानि प
शोर्गृह्णाति । न सर्वाणि ॥ अथवा हृदयादि निपचैव गृह्णाति ॥ अनयोः पक्षयोः श्येयादेवा
ववाय स्विष्टकृद्धोमः कर्त्तव्यः । अथवा सर्वाण्यपि पश्ववदानानि गृह्णाति ॥ अवदानैः सहै
वपशुपुरोडाशस्थाने स्थालीपाकं श्रपयित्वा तेन सह पश्ववदानानां प्रदानं भवति । सर्वेषु
स्मार्त्तेषु पाकयज्ञेषु पूर्णपात्रो दक्षिणा भवति ॥ वरो वा । पूर्णपात्रमिति स्थितिः । इति वर
शब्देन यस्मै दीयते तद् विज्ञषितेपय यजमानेन दातुं शक्यते धान्यहिरण्यवस्त्रगवादिकं द
न्निधियते ॥ तेन तर्हि यज्ञावार्यास्तुरवि होमाः ऽ स्मार्त्ताः पाकयज्ञाः पक्षादि प्रन्त्रतय इति स्व
भाष्ये व्याख्यातवंतः । अतश्च तेषां मते स्मार्त्तेषु पाकयज्ञेषु देवतोद्देशेन हविर्ग्रहणं । इध्मा ॥२१॥
वेदिप्रोक्षणं बर्हिः प्रोक्षणं स्तरणादिकं च दर्शपूर्णपात्रादिकमधिकं प्राप्नोति । यत्ना

21

चयनस्याश्वक्लौति स्त्रोपि स्वयमातृणामाघारितापांउत्तरवेदौतस्याउत्तरपदमातितश्चः तः स्वय
मातृणापाउपर्याग्निं स्थापयित्वा सोमयागः कर्त्तव्यः॥ ॥तिस्रो विज्योतिषउपधा एवा॥ सर्वास्तत्र पाउ
22 पधायना। श्रेष्ठे ह्वंकां उत्तरस्यितिसु पधायना॥ ॥यथवा पुनः सोमे स्वयमातृणाहीनामपि च पूर्वं न भवति
उत्तरवेदावेवाग्निं प्रणीय यागोनुष्ठेयः॥ ॥शांखायनसूत्रे। सर्वकारिणां छंदोगाध्वर्युयर्वक्षवेदपु
पदिष्टं कुर्युः॥ एतावत्वइष्टीनामानुपूर्व्यं हविषां देवतं जैरूपां श्रुतायां चाध्वर्युमनुविदधीत। छंदो
गाध्वर्युर्यवञ्चपदिश्यस्म ह्वति कल्लानुपदिष्टं कुर्युस्ततः कथमिति। इत्थं। इष्टीनामेतावत्त्वेषु सां हो...
तादिपरिमाणे। हविषां यागक्रमे॥ दैवतशब्देसम्गुणनिर्गुणे। ज्वैरूपांश्रुतायां च मंत्रादेः प्राह सः॥ ए
2 तेष्वध्वर्युमनुविदधीत। तदुक्तं कर्पादि॥ आम्नीमनुपदिष्टमध्वर्युपेक्षेत यजमानः। आध्वर्युमेवलादह्
ति शांखायनभाष्ये। तेन मेत्रावरुणापयस्यामाउपांशुत्वं देवस्य हविषां क्रमश्चाध्वर्युसूत्रात् श्र
वगंतव्यः॥ ॥इतित्रिरग्निचित्संम्राटस्थपतिमहायाज्ञिकश्रीप्रजापतिकृतेन याज्ञिकश्रीदेवेनष्ट
तायां कात्यायनसूत्रपद्धतौ अष्टादशोऽध्यायः समाप्तः॥ ॥संवत्र६ ८४ फाल्गुनसुदी ३ रवौ ति

धर्म

यज्ञपद्धतिः

नकलः १

श्रौत

कात्यायनसूत्रपद्धतिः

अङ्काः

४५४८

४५०

नं: ४५४८

पत्र २१

...बर
कंद
च

॥२१॥